# Ganesha Stava - Adi Sankara

ajam nirvikalpam niraakaaram-ekam

niraanandam aanandam advaita poornam

param nirgunam nirvishesham nireeham

para brahma roopam ganesham bhajema || 1 ||

gunaateetamaanam chidaananda roopam

chidaa-bhaasakam sarvagam jnana gamyam

munidhyeyam aakaasha roopam paresham

para brahma roopam ganesham bhajema || 2 ||

jagat kaaranam kaarana-jnana roopam

suraadim sukhaadim gunesham ganesham

jagad vyaapinam vishwa vandyam suresham

para brahma roopam ganesham bhajema || 3 ||

# गणेश स्तवः – आधि शन्कर

अजम् निर्विकल्पम् निराकारमेकम्
निरानन्दम् आनन्दम् अद्वैत पूर्णम्
परम् निर्गुणम् निर्विशेषम् निरीहम्
परब्रह्म रूपम् गणेशं भजेम ॥ १ ॥

गुणातीतमानं चिदानन्द रूपम्
चिदा–भासकम् सर्वगं ज्ञान गम्यम्
मुनिध्येयम् आकाश रूपम् परेशम्
परब्रह्म रूपम् गणेशं भजेम ॥ २ ॥

जगत्–कारणम् कारण–ज्ञान रूपम्
सुरादिम् सुखादिम् गुणेशं गणेशम्
जगद्व्यापिनं विश्व वन्द्यम् सुरेशम्
परब्रह्म रूपम् गणेशं भजेम ॥ ३ ॥